CS (MAIN) Exam:2016

**M–ESC–CU–SKT**

SANSKRIT

**( Compulsory )**

| Time Allowed : Three Hours | Maximum Marks : 300 |
|---|---|

**QUESTION PAPER SPECIFIC INSTRUCTIONS**

**Please read each of the following instructions carefully before attempting questions**

All questions are to be attempted.

The number of marks carried by a question/part is indicated against it.

Answer must be written in SANSKRIT (Devanagari script) unless otherwise directed in the question.

Word limit in questions, wherever specified, should be adhered to and if answered in much longer or shorter than the prescribed length, marks may be deducted.

Any page or portion of the page left blank in the Question-cum-Answer Booklet must be clearly struck off.

Attempts of questions shall be counted in sequential order. Unless struck off, attempt of a question shall be counted even if attempted partly.

---

संस्कृतम्

( अनिवार्यम् )

| समय: होरात्रयम् | पूर्णाङ्काः 300 |
|---|---|

**प्रश्नपत्रविषये विशेषनिर्देशाः**

**प्रश्नानां समाधानात् प्राक् सर्वेऽपि अधोलिखिताः निर्देशाः सावधानतया पठनीयाः**

सर्वेऽपि प्रश्नाः समाधेयाः।

प्रत्येकं प्रश्नस्य/प्रश्नभागस्य अङ्काः तत्पुरत एव निर्दिष्टाः।

यदि अन्यथा निर्देशो न भवेत् तर्हि प्रश्नानाम् उत्तराणि संस्कृतभाषया एव देवनागरीलिपिनिबद्धया लेखनीयानि।

यत्रापि शब्दसीमा निर्धारिता तत्र सा अनुपालनीया एव। उत्तराणि चेत् सीमातः अधिकमात्रया विस्तीर्णानि लघुतराणि वा भवेयुः तदा अङ्कहानिः भविष्यति।

प्रश्नपत्रसहितोत्तरपुस्तिकायाः किमपि पृष्ठं पृष्ठांशो वा यदि रिक्तः त्यज्यते सः अवश्यं स्पष्टतया रेखाचिह्नेन निरसनीयः।

प्रश्नक्रमानुसारमेव क्रमेण प्रश्नोत्तराणि प्रदेयानि। नचेत् अंशतः प्रदत्तं प्रश्नोत्तरमपि संपूर्णप्रश्नोत्तरवत् भवेत्।

**1.** अधोलिखितेषु कमप्येकं विषयमधिकृत्य षट्शतशब्देषु (*600* शब्देषु) निबन्धो लेख्यः — 100

*(a)* संस्कृतिः कथं सार्थका?

*(b)* 'स्मार्ट' (सुव्यवस्थितानि) नगराणि 'अ-स्मार्ट' (अव्यवस्थिताः) नागरिकाश्च

*(c)* न्यायिकसक्रियता तत्समक्षं न्यायिक-अतिक्रमणं (overreach) च

*(d)* विद्यालयछात्रेषु अस्माकं दायं (heritage) प्रति समादरस्य पोषणम्

**2.** अधोलिखितं गद्यांशं सावधानतया पठित्वा तदुपरिष्टाद् दत्तानां प्रश्नानमुत्तरं स्पष्टतया संक्षेपतश्च साधुगिरा दीयताम्— 12×5=60

एवं कथ्यते यत् स्त्रियः आकाशस्य अर्धं धारयन्ति। एतत्संशोध्य इदं साधयितुं शक्यते यत् ताः अर्धादपि अधिकं धारयन्ति। तथापि वस्तुतः सर्वेषु देशेषु, इतिहासस्य सर्वेषु कालेषु सर्वासु संस्कृतिषु परम्परासु च प्रत्येकस्मिन् क्षेत्रे, धर्मे, जातौ, वर्णे, वंशे, सम्प्रदाये प्रजातौ वा, अस्माकं वैविध्यपूर्णे अतीते परिवर्तमाने च वर्तमाने, जीवनस्य प्रायः सर्वेषु क्षेत्रेषु पुरुषाणां तुलनायां स्त्रियः लाभरहिताः आसन् सन्ति च। भोजने, सेवाकर्मणि, शिक्षायां, स्वास्थ्यसंरक्षायां विकासभागितायां, नेतृत्वविषये स्वप्नपूर्तिविषये ताभिः सह भेदव्यवहारः अक्रियत क्रियते च। वस्तुतः ताः विश्वस्य बृहत्तमाः अल्पसंख्यकवर्गीयाः युगे युगे आसन् अधुनापि च सन्ति।

स्त्रीन् प्रति पितृसत्तायाः व्यवहारः तादृशो नास्ति येन ताः स्वयमेव कर्तारः क्रियायाः प्रयोजनानि च सन्ति। तासु या दृष्टिः सा तादृशी नास्ति यथा ताः स्वयमेव पूर्णाः, स्वाभिमाने स्वायत्ततायां च यथा तासां पुरुषैः सह समकक्षता भाव्या, सामाजिकरीतिषु, विधौ, सांस्थानिकेषु क्रियाकलापेषु च ताः यथा समानसम्मानम् अधिकारांश्च प्राप्नुवन्ति। एतद्विपरीतं ताः पुरुषाणां साधनरूपा एव जाताः यासां कर्त्तव्यमस्ति सन्तानोत्पादनं, सेवाभावः, पुरुषाणां कामपूर्तिः परिवारस्य समृद्धेः संरक्षणं च। पुरुषाणां पुत्र्यः, पत्न्यः मातरश्च इत्येवं संलग्नकरूपैः एव तासां स्वीकार्यता अस्ति संस्कृतौ। अन्यथा ताः अनुपयोगिन्यः पतिताः वा सन्ति।

एकाकिन्यः स्त्रियः अस्माद् साधनता-वृत्ताद् बहिस्तिष्ठन्ति। याः स्त्रियः संस्कृतिसम्मतां विवाहावस्थां प्राप्य अपि अविवाहिताः याश्च विधवाः, विवाहोच्छेदं प्राप्ताः (divorced) वियुक्ताः वा वर्तन्ते तासामत्र अन्तर्भावः। पुरुषस्य 'संरक्षणस्य सुरक्षा'याश्च अभावः समाजेन निन्द्यते ततोऽधिकं तु तदा यदा काचित् नारी स्वेच्छया एतदस्वीकरोति। किन्तु यदा सा दुर्घटनायाः रुग्णतायाः वा कारणेन पतिना वियुज्यते तदापि ईदृशी एव प्रवृत्तिः समाजे दृश्यते। मनुष्यस्य क्रोधातिशयः तस्यै स्त्रियै आरक्षितः या पुरुषस्य सर्वव्यापिन्याः छायायाः बहिः निवसति।

सर्वाधिकेषु विकसितेषु देशेषु खाद्यान्नस्य 60–80 प्रतिशतं स्त्रियः उत्पादयन्ति। विश्वस्य अर्धं भोजनं च ताभिरेव उत्पाद्यते। संस्कृतिपरम्परायाम् अधिकांशगृहेषु ताः एव खाद्यवस्तूनि प्रयच्छन्ति। तथापि भारते सामाजिक-सांस्कृतिक-मान्यताभिः परिवारेषु तासां भोजनम् एवं निर्धार्यते येन स्त्रियः न केवलं न्यूनतममन्ते च खादन्ति अपितु कुटुम्बे खाद्यान्नस्य असुरक्षायाः स्थितौ ताः उपवासमेव कुर्वन्ति। कुटुम्बस्य अन्तःवर्तमानायाः असमानतायाः कारणात् तत्र समानवितरणस्थितौ सर्वेषां कृते पर्याप्ते भोजने विद्यमाने सत्यपि स्त्रियः पर्याप्ताद् पौष्टिकादाहाराद् वञ्चिताः भवन्ति। एकाकिन्यः स्त्रियः खाद्यान्नविषये जीविकायाः विषये च पक्षपातान् सामाजिकबन्धनानि च अनुभवन्ति यद्यपि ताः स्वतन्त्ररूपेण विश्वे संघर्षरताः सन्ति।

भारतं तेषु कतिपयदेशेषु वर्तते यत्र पुरुषाणां बालकानां च तुलनायां स्त्रियः बालिकाश्च न्यूनतराः। विगतशताब्द्यां जनसंख्यायां तेषां भागः निरन्तरं ह्रासोन्मुखः। 2001 तमस्य वर्षस्य जनगणनया इदं ज्ञायते यत् प्रतिसहस्रं पुरुषापेक्षया 933 स्त्रियः सन्ति। यदि स्त्रियः बालिकाश्च पुरुषैः बालकैः च समानान् स्वास्थ्यसंरक्षणं पोषकभोजनं चेत्यादीन् जीवितावसरान् प्राप्नुयुः तदा सुदृढमिदं संभाव्यते यत्स्त्रीणां बालिकानां च संख्या तुल्या भविष्यति। विपर्ययतः 2001 तमे वर्षे स्त्रियः बालिकाश्च पुरुषेभ्यः बालकेभ्यश्च संख्यातः सार्धत्रिकोटिपरिमितं न्यूनाः आसन्। लिङ्गानुपातः 2011 वर्षस्य जनगणनायां ईषत्प्रवर्धितो भूत्वा 940 संख्यां गतः। शून्यात् षड्वर्षपर्यन्तानां शिशूनां मध्ये बालकानामनुपातेन बालिकानां संख्या अतीव न्यूना जाता। 2001 तमे वर्षे इय 927 आसीत् प्रतिसहस्रम्। तदपेक्षयापि न्यूनतामवाप्य इयं संख्या 2011 तमे वर्षे 914 आसीत्। आभिः संख्याभिः इदं निस्सन्देहं निर्णीयते यत् भेदव्यवहारस्य विद्वेषस्य अवधीरणायाश्च सामाजिकी-सांस्कृतिकी-प्रक्रियाः तथा च प्रवर्धमानाः तकनीकी-प्रक्रियाः कोटिसंख्याकानां बालिकानां स्त्रीणां च जीवनानि नाशयन्ति। स्पष्टमिदं यत् अनेकैः मार्गैः अस्माकं भारतीयसमाजेन नियमितरूपेण कोटिसंख्याकाः बालिकाः स्त्रियश्च व्यापाद्यन्ते।

प्रश्नाः —

*(a)* जनगणनायाः संख्यात्मकानि तथ्यानि (Census figures) बालिकानां स्त्रीणां च विषये किं संदिशान्ति?

*(b)* भोजनस्य स्त्रीणां च विषये यद् वैषम्यं प्राप्यते तत्र का विडम्बना (irony) वर्तते?

*(c)* ''स्त्रियः अर्धादपि अधिकम् आकाशं धारयन्ति।'' अनेन कथनेन लेखकस्य कोऽभिप्रायः?

*(d)* ''पितृसत्तात्मके समाजे स्त्रियः पुरुषाणां साधनरूपा एव जाताः'' इति कथम् उच्यते?

*(e)* लेखकस्य मतेन अस्माकं समाजे एकाकिन्यः स्त्रियः केन प्रकारेण अधिकतरम् अरक्षिताः सन्ति?

**3.** अधस्तनगद्यांशस्य संक्षेपः मूलभागस्य तृतीयांशेन एव लेख्यः। निर्धारितशब्दसंख्यामध्ये लेखने व्यर्थता अङ्कक्षतिकारिणी। अत्र शीर्षनाम्नः न कापि आवश्यकता। संक्षेपः स्वशब्दैः लेख्यः — 60

निष्ठावत्त्वं प्रशस्तम् इति विषये अस्मासु भूयिष्ठानां जनानाम् ऐकमत्यं स्यात्। स्वकुटुम्बिजनान् प्रति, मित्राणि प्रति, राष्ट्रं प्रति च निष्ठां वयं संस्तुमः वस्तुतस्तु सर्वानपि तान् जनान् समूहान् प्रति च येषाम् उपकारान् प्रति वयं कृतज्ञाः स्मः। यदा च वयं 'निष्ठा'-विषये ब्रूमः तदा अयम् अस्माकमाशयः यत् तेषां विपत्तौ काठिन्येषु वा तेषां साहाय्यं कर्तुं वयमुद्यताः तेषां च कल्याणे अस्माकं सदैव अभिरुचिः वर्तते। यदा कश्चित् जनः निष्ठाविहीनः भवति तदा अयं विषयः सुस्पष्टं जायते यथा यदा सः स्वपितरौ प्रति तयोः पीडायाम् उदासीनवत् तिष्ठति अथवा यदा सः कस्याश्चित् सेनायां स्वराष्ट्रस्य विपक्षतः युध्यति स्वदेशीयांश्च जनान् निर्विवेकं हन्ति। अस्मासु भूयिष्ठाः जनाः ईदृशानां जनानां कार्याणि निन्दन्ति।

किन्तु अनेकधा स्थितयः एवं भवन्ति यदा कश्चिज्जनः निष्ठाविहीनः अस्ति न वा इति निर्णेतुम् अशक्यं जायते। कश्चित् मेधावी बालकः यदा स्वपितृभ्याम् अध्ययनं परित्यज्य तान् आर्थिकसाहाय्यं प्रदातुं कञ्चित् व्यवसायं सेवाकर्म वा स्वीकर्तुम् आदिश्यते तदा सः पित्रोः आदेशं न मानयति। तस्य मनसि अयं विश्वासो भवेत्—यदि अहं कतिपयवर्षपर्यन्तम् अध्ययनं करोमि तदा भाविनि काले तेषां सेवां सुष्ठुप्रकारेण कर्तुं शक्नोमि इति। किन्तु यदि अद्यैव सः अध्ययनात् विरमते तदा तस्य प्रतिभा व्यर्थतां प्राप्स्यति स च न कमपि सेवितुं शक्नोति।

कल्पनाविहीना जनाः अस्मै निर्णयाय तं बालकं तां बालिकां वा निन्देयुः किन्तु प्रायः ईदृशो बालः निन्दायाः स्थाने साहाय्यं प्रोत्साहनं च अर्हति यदि चेत् विचारशीलः कर्तव्यनिष्ठः स बालः अस्ति। एतद्विपरीतं कासुचित् विशिष्टासु स्थितिषु—यदि तस्य पितरौ अत्यन्तं दरिद्राः सन्ति—सः निष्ठाविहीन एवास्ति यदि सः तेषां साहाय्यं कर्तुं तत्परो न भवति। भाविनि काले यदि सः साफल्यमपि अवाप्नोति तदापि बाल्ये तस्य निष्ठाविहीनतायाः कृते तस्य जीवनपर्यन्तम् अनुतापः स्यात्।

अत्र एकः कठिनतरः प्रश्नः अस्ति स च अस्ति स्वदेशस्य सर्वकारेण सह कस्यचित् जनस्य सम्बन्धस्य प्रश्नः। केचित् मनुष्याः ये सत्यतया स्वदेशानुरागिणः तस्य सुखाय समृद्ध्यै च निरन्तरं समुत्सुकाः सन्ति स्वराष्ट्राय सर्वकारम् अहितकरं मन्यन्ते सर्वकारस्य उन्मूलनाय च अन्यम् उपायं न पश्यन्तः ते सशस्त्रं विद्रोहं कुर्वन्ति। सर्वकारेण ते सपदि राजद्रोहिणः देशद्रोहिणश्च इति संज्ञिताः स्युः। यद्यपि अत्र प्रथमा संज्ञा सर्वथा समीचीना स्यात् द्वितीया तु एवं भवितुं नार्हति। यतो हि सर्वकारापेक्षया स्वदेशवासिनां हितेभ्यः तेषां निष्ठा अधिका स्यात्। दुर्दैवात् यावत् कश्चित् विद्रोहः साफल्यं न गच्छति तावदिदं ज्ञातुं दुष्करं भवति यत् सः विद्रोहः राष्ट्रनिष्ठया वा प्रेरितः स्वार्थनिष्ठया वा। साफल्ये गते अयं प्रश्नः समुत्थास्यति—अधुना यदा विद्रोहिणः सफलीभूत्वा नव-सर्वकारं स्थापितवन्तः किं ते इदं स्वीकुर्वन्ति यत् राष्ट्रस्य सर्वेषां लोकानां—अत्र च तेषां राजनीतिकाः विरोधिनः अपि अन्तर्भाविताः —न्यूनतमाः केचन अधिकाराः सन्ति तद्यथा, स्वतन्त्रतया स्वमतस्य अभिव्यक्तेः अधिकारः लोकानां समर्थनस्य प्राप्तये प्रयतितुम् अधिकारश्च? अथवा किं ते स्वशक्तेः उपयोगं राजनीतिकविरोधिनां नाशार्थं कुर्वन्ति? यदि तेषां प्रथमम् आचरणम् अस्ति तदा वयं जानीमः यत्ते सत्यमेव स्वकीयं राष्ट्रं प्रति निष्ठावन्तः न तु केवलं स्वसमुदायस्य हितानां साधकाः। किन्तु यदि तेषामाचरणं द्वितीयकोटौ आगच्छति तदा पूर्वसर्वकारापेक्षया ते स्वदेशं प्रति अधिकं निष्ठावन्तः न सन्ति। केवलमिदं स्यात् यत् अयं बोधः अतिबिलम्बेन प्राप्तः।

**4.** अधःस्थगद्यभागस्य आङ्गलभाषया अनुवादः कर्तव्यः — 20

एकः अमीरः (Ameer) स्वीये जलयाने समुद्रयात्राम् अकरोत्। सहसा झंझावातः तत्र प्रादुरभूत्। याने एकः दासः आसीत् येन कदाचिदपि समुद्रो न दृष्टः। भयाक्रान्तो भूत्वा सः रोदितुं विलपितुं च प्रारभत। किञ्चित्कालपर्यन्तम् इदं प्रवृत्तं न तु कोऽपि तं मौनीकर्तुं समर्थः। क्रुद्धो भूत्वा अमीरः अपृच्छत्—''किमत्र कोऽपि नास्ति यः एनं नराधमं कापुरुषं तूष्णीं कर्तुं समर्थः?''

एकः दार्शनिकोऽपि तस्मिन् जलयाने यात्री आसीत्। सोऽवदत्—''मन्ये श्रीमन्, अहम् इमं जनं तूष्णीं कर्तुं शक्नोमि। किन्तु यथा अहमिच्छामि तथैव अनेन सह व्यवहरिष्यामि इत्यर्थं माम् अनुज्ञातुमर्हति भवान्।'' ''मत्सकाशात् अनुज्ञा अस्ति। यथा भवानिच्छसि तथा कुरु'' इति अमीरः तम् अवोचत्।

दार्शनिकः कांश्चित् नाविकान् आहूतवान् तं दासं समुद्रे प्रक्षेप्तुं च तान् आदिशत्। तैः एवं कृतम्। नैराश्यवशात् सः वराकः भयेन क्रोशन् वेगेन हस्तपादौ संचालयितुं प्रारभत। कतिपयक्षणानन्तरमेव दार्शनिकेन तं जलयाने प्रत्यानेतुं नाविकान् आदिष्टवान्। यानं प्राप्तः स दासः अवसन्नः भयभीतश्च यानतले अशेत सर्वथा तूष्णींभूतः। तस्मिन् इदमाकस्मिकं परिवर्तनं संलक्ष्य चकितो भूत्वा अमीरः तस्य कारणविषये जिज्ञासितवान्। दार्शनिकः अकथयत्—''यावद् वयं निकृष्टतरायाम् अवस्थायां न पतामः तावद् वर्तमानावस्था कियती सुखकरी इति न जानीमः।''

**5.** अधस्तनगद्यांशस्य संस्कृतभाषानुवादः करणीयः — 20

Man has always been fascinated by dreams. He has always tried to find explanations for his dreams. Perhaps dreams tell us about the future or the past, perhaps they tell us about our deepest fears and hopes. I don't know. Today, I want to give you a completely different explanation. But before I do so, I must give you one or two facts about dreams. First of all, everybody dreams. You often hear people say, 'I never dream', when they mean, 'I can never remember my dreams'. When we dream, our eyes move rapidly in our sleep as if we were watching a moving picture, following it with our eyes. This movement is called REM, that is Rapid Eye Movement. REM sleep is the sleep that matters. Experiments have proved that if we wake people throughout the night during REM, they will feel exhausted the next day. But they won't feel tired at all if we take them at times when they are not dreaming. So the lesson is clear : it is dreaming that really refreshes us, not just sleep. We always dream more if we have had to do without sleep for any length of time.

If that is the case, how can we explain it? I think the best parallel I can draw is with computers. After all, a computer is a very primitive sort of brain. To make a computer work, we give it a programme. When it is working, we can say it is 'awake'. If ever we want to change the programme, that is to change the information we put into the computer, what do we do? Well, we have to stop the computer and put in a new programme or change the old programme.

**6.** *(a)* अधोलिखितानां स्वरचित-वाक्येषु प्रयोगः कार्यः — 2×5=10

*(i)* ऋते

*(ii)* एव

*(iii)* अन्तरेण

*(iv)* प्रायः

*(v)* विना

*(b)* पदसाधनं क्रियताम्— 1×10=10

*(i)* युष्मद् + प्रथमा एकवचनम्

*(ii)* गिरि + तृतीया एकवचनम्

*(iii)* पितृ + सप्तमी एकवचनम्

*(iv)* महत् + द्वितीया बहुवचनम्

(v) भू + लिट्, प्रथमपुरुषे एकवचनम्

(vi) क्रीड् + लृट्, उत्तमपुरुषे बहुवचनम्

(vii) जि + लट्, प्रथमपुरुषे बहुवचनम्

(viii) पठ् + विधिलिङ्, उत्तमपुरुषे द्विवचनम्

(ix) क्षम् + लङ्, प्रथमपुरुषे एकवचनम्

(x) एध् + लट्, प्रथमपुरुषे बहुवचनम्

(c) समासो विधेयः, समासनाम च लेखनीयम्— 2×5=10

(i) मक्षिकाणाम् अभावः

(ii) पञ्चानां गवां समाहारः

(iii) अहश्च रात्रिश्च

(iv) दिक् अम्बरं यस्य सः

(v) कृष्णं श्रितः

(d) अधोलिखितानि वाक्यानि शुद्धीकरणीयानि— 2×5=10

(i) भवान् कुत्र गच्छसि।

(ii) ग्रामस्य परितः वृक्षाः।

(iii) मूर्खः हितवादिनं क्रुध्यति।

(iv) रामेण अपठत्।

(v) मन्त्री राज्ञः समम् आगच्छत्।

★★★